केरलविश्वविद्यालयः

अनन्तशयनसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः – २०३

आदिनारायणविरचिता

चतुर्वेदमहावाक्यटीका– चिन्तामणिः

प्रकाशकः

डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यग्रन्थप्रकाशनकार्यालयाध्यक्षः ।

अनन्तशयने एस्. वी. जी. मुद्रणालये मुद्रितम् ।

१९६३/११३८

मूल्यं रूप्यकमेकम्

INTRODUCTION

The CATURVEDAMAHĀVĀKYAṬĪKĀ-CINTĀMAṆI of Ādinārāyaṇa was published in Vol. X. Nos. 3 & 4 of the Journal of the Kerala University Oriental Manuscripts Library. The edition is based on a transcript belonging to this Library (No. 812). It was copied in Kollam 1104 from an original manuscript in the possession of Dharmarāja Śāstri Ādinārāyaṇa Śāstri of Nagercoil. The transcript contains 17 sheets out of which the Caturvedamahāvākyaṭīkā- Cintāmaṇi occupies 14 sheets.

The work is a sort of beginner's Primer in Advaita Vedānta. It is in the form of a commentary on four mahāvākyas taken from Upaniṣads connected to the four Vedas. The work contains an introduction and conclusion dealing with the basic doctrines of Advaita Vedānta.[1]

---

1. *The author adopts the Bimbapratibimbavāda instead of the avacchedavāda ; this might be indicative of his leaning towards the Vivaraṇa school of post- Śaṅkara Advaita Vedānta.*

अनेकत्वेनाविद्यायास्तत्तत्प्रतिबिम्बस्वरूपजीवोऽप्यनेकः। P.2.l. 16.

The work starts with the author's prayer for the blessings of 'God Hari' and the propounders of Advaita like Bādarāyaṇa, Gauḍapāda and Śrī Śaṅkarācārya. A prayer is also addressed to Hayagrīva. (p.1).

The author then takes up a discussion of the cosmological process according to Advaita. In the beginning there was only Brahman, the non-dual Being, Existence- Knowledge- Bliss, the Creative Principle (Mūlaprakṛti) being latent in It.

In the flux of Creation this Mūlaprakṛti underwent a triple division: first, as Māyā, predominating in Sattva guṇa and in which Brahman is reflected as Īśvara, secondly, as avidyā, participating in the other guṇas too to a certain extent and in which Brahman is reflected as the numerous Jīvas, and thirdly, as tāmasaprakṛti, predominating in tamoguṇa and which forms the material, cause in the evolution of the whole Universe. Brahman the subsistent in all the multifarious objects of the world, forms the Vivartakāraṇa. The five primordial elements originate from the association of Brahman with the tāmasaprakṛti, and the five organs of knowledge are formed out of these elements. Antaḥkaraṇa (or the inner organ) is formed by the accumulation of the sattvaguṇa of all the five bhūtas[2]. (p.2). Similarly the five organs of action, and life (Prāṇa) are formed by the accumulation of

---

2. *This probably means only that sattvaguṇa predominates in antaḥkaraṇa.*

the rajoguṇa of all the five bhūtas. The body which consists of the five organs of knowledge, the five organs of action, the five antaḥkaraṇas[3] and the five prāṇas is called the liṅga or sūkṣma śarīra, or subtle body.

The process technically called Pañcīkaraṇa in Advaita Vedānta, by which the five gross elements are formed by a sort of systematic break-up and mixing of the five primordial bhūtas (elements) is described. (p. 3). Out of these five gross bhūtas originate the entire Universe consisting of the five "avaraṇas" and the fourteen worlds. The four types of life-Jarāyuja, Aṇḍaja, Svedaja and Udbhijja- also evolve out of these five gross elements.

In the Universe thus created the Jīva who is enveloped by avidyā lives under an illusion identifying the Self with the non-Self. The world is therefore a reflection of the Supreme, empirically real in the waking state, apparently real in the sleeping state, and absolutely real in deep sleep[4]. However, in all the three states Brahman as sākṣi-caitanya, termed Jīvātmā, antarātmā and paramātmā respectively, is ever-present. The

---

3. ज्ञानमनोबुद्धिचित्ताहङ्कारभेदेन पञ्चविधम्। P. 3. l. 1.

4. जाग्रत् – व्यावहारिक
स्वप्न – प्रातिभासिक
सुषुप्ति – पारमार्थिक

five Kośas-annamaya for the gross body, prāṇamaya, manomaya and vijñānamaya for the subtle body, and ānandamaya for the causal body-are also described. (p.4).

Definitions of the five powers, prakṛti, māyā, avidyā, āvaraṇa and vikṣepa - sometimes collectively called Māyā - are given. Īśvara is called Virāṭ, Vaiśvānara or Brahma in the waking state, Hiraṇyagarbha, Sūtrātmā or Viṣṇu in the sleeping state, and Antaryāmī or Rudra in deep sleep. The other two states of Īśvara, Avyakta and Śuddha, and the five types of Jīvanmuktas are also described. (p. 5). Ādinārāyaṇa then proceeds to deal with the four mahāvākyas. Introducing the subject he gives the division of vākya into vaidika and laukika and the division of Veda into the three kāṇḍas, the Karma kāṇḍa, Upāsanā Kāṇḍa and Jñāna Kāṇḍa.

The first mahāvākya that the author has chosen to comment on is प्रज्ञानं ब्रह्म (Ait.5,3). Eliminating the body etc. the word prajñāna is taken to mean the sākṣi-caitanya present in all states of the jīva. By Brahman is meant the Absolute Reality and the non-duality of these two is expressed by the mahāvākya. (p. 7). The second mahāvākya is अहं ब्रह्मास्मि (Bṛhlad. 1,4,10). Here the commentary describes the well-known advaitic principle of the unity of the Self and the absolute Self. (p. 8.) The mahāvākya तत्त्वमसि (Chand. 6, 8, 7.) is commented on thirdly. Fourthly, अयमात्मा ब्रह्म [Māṇḍū. 2.] is commented on. Here the author has dwelled upon the indivisibility of Brahman and the ultimate destiny of one who seeks

knowledge of Brahman. (p.10 & 11),

Continuing the above topic the author has described the Sādhanacatuṣṭaya i.e. the qualifications that an aspirant for mokṣa should necessarily have as well as the discipline that such an one should follow. (p.12).

The work is concluded with a study of the stages through which pralaya takes place. The gross elements (sthūlabhūtas) change into their subtle (sūkṣma) counterparts and these in turn dissolve in the Āvaraṇaśakti. A process of systematic involution takes place and ultimately nothing but Brahman remains. (p. 13).

The author.

Practically nothing is known regarding the author of the Caturvedamahāvākyaṭīkā-Cintāmaṇi other than that his name is Ādinārāyaṇa. (युक्तितो बुद्धितश्चाप्यादिनारा-यणबुधेन तु । p. 13). This verse is found with a slight modification in a short work which is found copied in the same transcript (No. 812) as we have used to edit the present work. This is called the Advaitāmṛtasārakam and also deals with the broad principles of Advaita Vedānta in sixteen verses. Presumably this is another work by Ādinārāyaṇa.

The author makes his obeisance to God Rāma of Kalyāṇācala at the end of the work:

कल्याणाचलकोदण्डः कल्याणाचलमन्दिरः ।
कल्याणवेषधारीशः कल्याणं कुरुतां सदा ॥ (p. 14.)

The Kalyāṇācala referred to in this verse could be either the Veḷi hills near Nagercoil or a temple named Kalyāṇācala near Mannārgudi dedicated to Śrī Rāma. No temple dedicated to Śrī Rāma is found in the Veḷi hills. Hence the author might be referring to the temple at Mannārgudi referred to above. It might be presumed, therefore, that Ādinārāyaṇa belonged to Mannārgudi or to its suburbs.

Date of the work.

Nothing definite could be said regarding the date of the composition of the work, though from the contents and mode of presentation it seems to be of recent origin.

I thank Sri. A. Ramachandra Sastri, Research Officer and Assistant Research Officers Sri. M. Madhavan Unni and Sri. C. P. Madhavan Namboodiri who helped me in bringing out this work.

Trivandrum.
1 - 4 - '63

K. Raghavan Pillai,
Curator.

॥ श्रीः ॥

चतुर्वेदमहावाक्यटीका चिन्तामणिः ।

स्मृते सकलकल्याणभाजनं यत्र जायते ।
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् ॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनःपुनः ॥

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो वंशऋषिभ्यः । नमो गुरुभ्यः । सर्वोपप्लवरहितः प्रज्ञानघनः प्रत्यगर्थो ब्रह्मैवाहमस्मि ।

नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥

श्रीशङ्कराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम् ।
तं तोटकं वार्तिककारमन्यानस्मद्गुरून् सन्ततमानतोऽस्मि ॥

हृदि विन्यस्य विश्वेशं विद्यारण्यमुनीश्वरम् ।
नमस्कृत्य महावाक्यटीकां कुर्वे यथामति ॥

विशुद्धविज्ञानघनस्वरूपं विज्ञानविश्राणनबद्धदीक्षम् ।
दयानिधिं देहभृतां शरण्यं देवं हयग्रीवमहं प्रपद्ये ।

गद्यपद्यमयीं वाणीं समस्तजनरञ्जनीम् ।
उल्लासय समारूढो जिह्वाग्रं मे हयानन! ॥
सर्वं जानाति सर्वज्ञः किञ्चिज्ज्ञोऽन्यो भवेदिह ।
इन्दुक्ष्वेडन्याय इव प्राज्ञो यः श्लाघते गुणम् ॥

सृष्टेः पूर्वं सच्चिदानन्दस्वरूपं ब्रह्मैकमेवासीत् । अत्र जाग्रत्स्वप्नसुषुप्तिषु क्रमेण सच्चिदानन्दशक्तिभिः सार्कं यद्वर्तते तत् सच्चिदानन्दमिति व्युत्पत्त्या यौगिकत्वेन तस्मिन् ब्रह्मणि या सत्त्वरजस्तमोगुणात्मिका अचिन्त्या अनिर्वचनीया मूलप्रकृत्यादिशब्दवाच्या (अत?अनात्म-) जडदुःखस्वरूपा अज्ञानाकारभूता अग्नौ दाहकशक्तिरिव लीना आसीत्। बहु स्यां प्रजायेयेति श्रुत्या सृष्टिकाले सा स्वस्यां लीनप्राणिकर्मपरिपाकवशाच्च क्षुब्धा सती त्रेधा जाता। तत्रैका विशुद्धसत्त्वगुणप्रधाना माया। सैव सर्वज्ञोपा(धी?धिः)ई)श्वरकारणशरीरमव्याकृतमित्येवं नामचतुष्टयवाच्या। तस्यां ब्रह्म प्रतिबिम्बति। स ईश्वरः। स मायां वशीकृत्य वर्तते। तस्य मायावशात् सर्वज्ञत्वादयो गुणा भवन्ति। किञ्चिन्मलिनानेकखण्डस्वरूपा द्वितीया। सैवाविद्या किञ्चिज्ज्ञोपाधिर्जीवकारणशरीरमित्येवं नामत्रयवाच्या। तस्यां ब्रह्म प्रतिबिम्बति। स जीवः। अनेकत्वेनाविद्यायास्तत्तत्प्रतिबिम्बस्वरूपजीवोऽप्यनेकः। स तु अविद्याधीनः। तस्याविद्याधीनत्वेन कर्तृत्वभोक्तृत्वादयो गुणाः भवन्ति। तमःप्रधाना तृतीया। तस्यास्तामसप्रकृतिरिति संज्ञा। जीवादृष्टवशात् सा ईश्वरेण प्रेरिता सती जगतो दध्नः क्षीरमिव परिणाम्युपादानम्। सर्वाधिष्ठानं ब्रह्म सर्पस्य रज्जुरिव विवर्तोपादानम्। तामसप्रकृति(रिति?) समवेताद् ब्रह्मण आकाशः सम्भूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी। सत्त्वरजस्तमोगुणात्मकानाम् एतेषामाकाशादिपञ्चसूक्ष्मभूतानां पृथक् पृथक् सत्त्वगुणेन क्रमेण श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि जातानि। एतेषां भूतानां सत्त्वगुणसमष्ट्या अन्तःकरणं जातम्। तद्

ज्ञानमनोबुद्धिचित्ताहङ्कारभेदेन पञ्चविधम्। पश्चादेतेषां भूतानां पृथक् पृथग् रजोगुणेन क्रमेण वाक्पाणिपादपायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि जातानि। एतेषां भूतानां रजोगुणसमष्ट्या प्राणो जातः। स प्राणापानव्यानोदानसमानभेदेन पञ्चविधः।

नागः कूर्मोऽथ कृकरो देवदत्तो धनञ्जयः।
एते पञ्च उपप्राणास्तेषां भेदः प्रकीर्तितः॥

शब्दस्पर्शरसरूपगन्धाः श्रोत्रादिपञ्चज्ञानेन्द्रियविषयाः। दृश्यसंशयनिश्चयगर्वस्मरणानि अन्तःकरणपञ्चकविषयाः। वचनादानगमनविसर्गानन्दाः वागादिपञ्चकर्मेन्द्रियविषयाः। प्राग्गमनावाग्गमनाविष्वग्गमनोत्क्रमणाशितपीतादिशमीकरणानि प्राणपञ्चकस्य विषयाः। छर्द्यादिनिमेषोन्मेषक्षुज्जृम्भणस्थौल्यकर्मकारिणश्च क्रमेण पञ्चोपप्राणाः।

ईशः सोमः सुराचार्यः क्षेत्रज्ञो रुद्र एव च।
एते पञ्चाधिदेवाः स्युः पञ्चान्तःकरणस्य तु॥

दिग्वातार्कप्रचेतोऽग्निदेवाः श्रोत्रादिषु क्रमात्।
अन्तर्यामी च सर्वज्ञः सर्वेशः प्रेरकस्तथा॥

सर्वकर्ता च पञ्च स्युर्व्यानप्राणादिषु क्रमात्।
वागादीन्द्रियदेवास्तु वह्नीन्द्रोपेन्द्रमृत्युकाः॥

जयोऽजयो विश्वयोनिर्विश्वसृष्ट्या विशिष्टकः।
एते पञ्च उपप्राणदेवा एव भवन्ति च॥
पञ्चविंशतितत्त्वानां क्रमादेतेऽधिदेवताः।

अथ ज्ञानेन्द्रियपञ्चकम् अन्तःकरणपञ्चकं कर्मेन्द्रियपञ्चकं प्राणपञ्चकं च एकीभूय लिङ्गाख्यं सूक्ष्मशरीरं जातं जीवस्य।

अथ पञ्चीकरणं निरूपयिष्यते। तमोगुणप्रधानानि अपञ्चीकृतपञ्चसूक्ष्मभूतानि प्रत्येकं द्वेधा विभज्य तत्र पृथक् पृथगेकैकमर्धं विहाय

अन्यमेकैकं चतुर्धा विभज्य तत्र पृथक् पृथक् स्वार्धं स्वांशं विना मध्ये स्वार्धप्राधान्यं यथा भवति तथा पृथिव्याद्यंशक्रमिकेतरांशैर्योजनमेव पृथिव्यादिपञ्चभूतानां पृथक् पृथक् पञ्चीकरणम् । एवं पञ्चीकृतैः स्थूलैः पञ्चमहाभूतैः ब्रह्माण्डं जातम् । तस्य बहिः उत्तरोत्तरदशगुणाधिकं पृथिव्याद्यावरणपञ्चकं तदन्तश्चतुर्दश भुवनानि । अथ त्वक्चर्ममांसरुधिरास्थिमेदोमज्जेति षण्णां स्थूलभूततत्त्वानां समष्टिस्वरूपेण जरायुजाण्डजस्वेदजोद्भिज्जभेदेन उत्तममध्यमाधमजातिभेदेन च जीवस्य स्थूलशरीराणि वस्त्राभरणानि भोग्यभोज्यवस्तूनि समस्तानि जातानि। एवं सृष्टे जगति जीवश्चाविद्यामोहितः सन् स्थूलशरीरं सूक्ष्मशरीरं कारणशरीरं च स्वात्माभेदेन बुद्ध्वा देहीभूय धर्मकर्माणि स्वस्मिन्नारोप्य स्वप्नदृष्टवत् अहं मनुष्यः स्थूलः कृशः ह्रस्वः दीर्घः कर्ता भोक्ता मन्ता सुखदुःखे मम पुत्रः मम गृहं मम धनं श्रेयः संपादनीयं अश्रेयो निवर्तनीयम् इत्यगाधदुःखोदयसंसारसागरे निमज्जन्नात्माज्ञानादिभिः परिभ्रमतीत्येवंप्रकारेण अद्वैतवस्तुभूते ब्रह्मणि अज्ञानेनावस्तुभूतस्य द्वैतप्रपञ्चस्य अध्यारोप उच्यते, यथा रज्जौ सर्पस्यारोपस्तथा । अयं जीवः क्रमेण जाग्रत्स्वप्नसुषुप्तिषु स्थूलसूक्ष्मकारणशरीरमपि अहमिति मन्यमानः कर्माभिमानीत्यतस्तस्य जाग्रति विश्वो व्यावहारिकश्चिदाभासः, एवं तस्य स्वप्ने तु तैजसः प्रातिभासिकः स्वप्नकल्पितः, एवं तस्य सुषुप्तौ तु प्राज्ञः पारमार्थिकः अविद्याच्छन्नः । किञ्च अवस्थात्रयेऽपि पृथक् पृथक् साक्षिभूतब्रह्मचैतन्यस्य जाग्रति जीवात्मा स्वप्ने त्वन्तरात्मा सुषुप्तौ परमात्मा, एवमवस्थात्रयसाक्षिभूतब्रह्मचैतन्यस्य तु ज्ञानात्मा कूटस्थ इति नामद्वयमस्तीत्येवं जीवसाक्षिचैतन्ययोरवस्थात्रयं तदनुसृत्य नामानि च निरूपितानि । किञ्च अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयपञ्चकोशानां मध्ये स्थूलशरीरस्यान्नमयकोशत्वं सूक्ष्मशरीरस्य प्राणमयकोशत्वं मनोमयकोशत्वं विज्ञानमयकोशत्वं च कारणशरीरस्य (तु) आनन्दमयकोशत्वमेव भवति ।

अत्र ब्रह्मस्वरूपप्रपञ्चे ब्रह्मतादात्म्यं विना भेदग्रहकारिणी प्रकृतिः। अलीकभूतप्रपञ्चसत्यताबुद्धिकारिणी माया। देहादौ स्वाभेदबुद्धिकारिणी अविद्या। शरीरत्रयजीवसाक्षिचैतन्यादितत्त्वानाम् अन्योन्यभेदग्रहविघटिनी त्वावरणशक्तिः। सर्वविषयेऽपि प्रवृत्तिकारिणी विक्षेपशक्तिः। तत्र तत्र तेषां तत्त्वानां याथार्थ्यग्रहणात् प्रकृतिमायाविद्यावरणविक्षेपानां निवृत्तिः। ततः परमेश्वरस्याप्यवस्थात्रयम्। तदनुसृत्य नामानि च निरूपयिष्यते।

ईश्वरस्य जाग्रति विराड् वैश्वानरः ब्रह्मेति नामत्रयमस्ति। एवं तस्य स्वप्ने तु हिरण्यगर्भः सूत्रात्मा विष्णुरिति नामत्रयं भवति। एवं तस्य सुषुप्तौ तु अन्तर्यामी रुद्र इति नामद्वयं भवति। अथात्र विशेषमाह—

जीवेश्वरयोः पृथक् पृथग् अवस्थापञ्चकं जीवन्मुक्तस्य तु नामपञ्चकमप्यस्तीति केचन वदन्ति। तत् कथमिति चेदाह — जाग्रत्स्वप्नसुषुप्त्यव्यक्तशुद्धमित्यवस्थापञ्चकम्। ब्रह्मविद् ब्रह्मविद्वरः ब्रह्मविद्वरीयान् ब्रह्मविद्वरिष्ठः विदेहमुक्त इत्येवं जीवन्मुक्तस्य पञ्च नामानि च भवन्ति। जाग्रति विराट्स्वरूपस्येश्वरस्य पञ्चीकृतपञ्चमहाभूततत्कार्यस्थूलशरीरसमष्टिस्वरूपत्वं भवति। एवं स्वप्ने हिरण्यगर्भस्येश्वरस्य अपञ्चीकृतसूक्ष्मपञ्चभूततत्कार्यसूक्ष्मशरीरसमष्टिस्वरूपत्वं भवति। एवं सुषुप्तौ अन्तर्यामिस्वरूपस्येश्वरस्य अज्ञानवृत्तिकारकप्रकृतिमायाविद्यावरणविक्षेपात्मककारणपञ्चभूतस्वरूपत्वं भवति। एवमव्यक्ततुरीयावस्थायां वासनाभूतेश्वरस्य अभिन्नप्रतिबिम्बस्वरूपेश्वरजीवाभिन्नशक्तिककालकमदिक्स्वरूपवासनापञ्चभूतस्वरूपत्वं भवति। एवं केवलातीतावस्थायां शुद्धस्य तस्य सत्यं ज्ञानम् अनन्तम् आनन्दं वस्तु इत्यध्यासनामपञ्चकत्वं भवति। अथ विराड्हिरण्यगर्भाव्याकृताव्यक्तशुद्ध*भूतानां पूर्वपूर्वादुत्तरोत्तरस्य दशगुणाधिक्येन

* अत्र भूतपदं स्वरूपार्थकम्।

व्यापकत्वं भवति । शुद्धभूते अव्यक्ताव्याकृतहिरण्यगर्भविराडाकाश-वायुतेजोजलपृथिवीस्थूलशरीरसमष्टिसूक्ष्मशरीरसमष्टिकारणशरीरसमष्टि-जीवसमष्टीनां पूर्वपूर्वादुत्तरोत्तरस्य दशगुणन्यूनतया व्याप्यत्वं भवति । अत्र व्यष्टिजीवस्याणुत्वं* जीवसाक्षिणस्त्वणुतरत्वं भवति । किञ्च समष्टिजीवस्य महत्त्वं सर्वसाक्षिणस्तु महतो महत्त्वं भवति । एवं विराड्ढिरण्यगर्भाव्याकृताव्यक्तशुद्धभूतानां मध्ये अव्याकृताव्यक्तयो-रैक्ये तदा भूतचतुष्टयं भवति । एवं चतुर्णां भूतानां मध्ये विराड्-ढिरण्यगर्भयोरैक्ये तदा भूतत्रयं भवति । एवं त्रयाणां भूतानां मध्ये विराडादिचतुर्णामैक्ये तदा भूतद्वयं भवति । एवं द्वयोरप्यैक्ये तदा एकमेव शुद्धं भवति । तत् किमिति चेत् प्रणवार्थ एव भवति । एवं जीवन्मुक्त(स्य ? :) स्वरक्षणे विहितनिष्कामनित्यकर्मानुष्ठानेन युक्तभोगवान् वा सहितसुखदुःखानुभववान् वा यः स एव ब्रह्मवित् । एवं यथेच्छाकर्मयथेच्छाभोगवान् वा स्वेन संरक्षितशरीरवान् वा यः स एव ब्रह्मविद्वरः । आनन्दरातिरानन्दयुतो वा स्वेतरपोषितशरीरवान् वा यः स एव ब्रह्मविद्वरीयः । आत्मरातिरात्मानुभववान् वा स्वेन वा स्वेत-रेण वा संरक्षितशरीरवान् वा यः स एव ब्रह्मविद्वरिष्ठः । मौनी स्वानु-भववान् वा वृत्तिशून्यो वा यः स एव विदेहमुक्तः ।

एवं स्थिते जगति अत्रेदं किञ्चिद्विचार्यते — लोके प्रायशो व्यावहारिका एकपञ्चाशद्वर्णाः सन्ति । तत्र एकद्वित्र्यादिवर्णघटितं पदम् । अनेकपदघटितं वाक्यम् । अत्र वाक्यं द्विविधं वैदिकं लौकिकं चेति । तत्र वैदिकवाक्यं द्विविधं विधिरर्थवादश्चेति । तत्र विध्यर्थबोधकलिङ्लोट्तव्यप्रत्ययादिपदघटितवाक्यं विधिवाक्यम् । विध्यर्थदृढीकरणकारकमर्थवादवाक्यम् । एवंभूतानेकवाक्यघटितो वेदः । स तु कर्मकाण्डः उपासनाकाण्डः ज्ञानकाण्डश्चेति त्रिविधः ।

---

* अत्र अणुत्वमहत्त्वे सूक्ष्मत्वव्यापकत्वलक्षणे बोध्ये । न पारिभाषिके ।

तेषां पूर्वपूर्वादुत्तरोत्तरस्याधिक्यं भवति। काण्डत्रयात्मकोवेदोऽपि ऋग्यजुस्सामाथर्वणभेदेन चतुर्विधः। तेषां यानि महाफलार्थबोधकानि तानि बहूनि वाक्यानि ज्ञानाकाण्डोपनिषदि वर्तन्ते । तस्मात् तस्या उत्कृष्टत्वं भवति। एवं चतुर्णामपि वेदानामेकैकस्मिन् एकैकं महावाक्यमस्ति तत् किमिति चेदाह—

॥ प्रज्ञानं ब्रह्म ॥

इति ऋग्वेदमहावाक्यम् । प्राथमिकत्वात् तस्यैवादावर्थो विचार्यते – अथात्र प्रज्ञानपदं स्थूलभूतशरीरपरं न सम्भवति । तस्य जडत्वाद् अन्तःकरणसापेक्षत्वेनेन्द्रियाणामपि प्रज्ञानपदवाच्यत्वं न सम्भवति । एवं सुषुप्तिकालोपरतत्वेनान्तःकरणस्यापि प्रज्ञानपदवाच्यत्वं न सम्भवति । एवमविद्यायाश्चाज्ञानकारकतयाप्रमाणत्वेन प्रज्ञानपदवाच्यत्वं न सम्भवति । एवं किञ्चिज्ज्ञत्वेन जीवस्यापि प्रज्ञानपदवाच्यत्वं न सम्भवति इति चेद्, अत्रोच्यते– अवस्थात्रयसाक्षिचैतन्यमेव प्रज्ञानपदवाच्यम् । तस्यावस्थात्रयसाक्षितया व्यापकत्वेन सर्वज्ञत्वात् तादृग्भूतसाक्षिचैतन्यं येन अन्तःकरणेन श्रोत्रादिज्ञानेन्द्रियद्वारा शृणोति स्पृशति पश्यति लिह्यति जिघ्रति वदतीत्यादिप्रमाणैस्तस्य तेषां वैशिष्ट्यात् प्रज्ञानपदवाच्यत्वं भवति। यदा तेषां वैशिष्ट्यराहित्य तस्य तदा प्रज्ञानपदलक्ष्यार्थत्वं भवति। एवं ब्रह्मणोऽप्यवस्थाचतुष्टयमध्ये जाग्रति पञ्चीकृतपञ्चमहाभूततत्कार्यस्थूलशरीरसमष्टिविराट्स्वरूपत्वम् । एवं तस्य स्वप्ने तु सूक्ष्मपञ्चभूततत्कार्यसूक्ष्मशरीरसमष्टिहिरण्यगर्भस्वरूपत्वम् । एवं तस्य सुषुप्तौ तु अज्ञानवृत्तिकारकप्रकृतिमायाविद्यावरणविक्षेपात्मककारणपञ्चभूतस्वरूपत्वम्। एवं तस्य तुरीयावस्थायां अभिन्नप्रतिबिम्बेश्वरजीवाभिन्नशक्तिककालकर्मादिकस्वरूपवासनापञ्चभूतस्वरूपत्वं च भवतीत्यतः तस्य ब्रह्मशब्दवाच्यार्थत्वं भवति। पूर्वोक्तावस्थाचतुष्टयोपाधिरहितशुद्ध-

तेषां पूर्वपूर्वादुत्तरोत्तरस्याधिक्यं भवति। काण्डत्रयात्मकोवेदोऽपि ऋग्यजुस्सामाथर्वणभेदेन चतुर्विधः। तेषां यानि महाफलार्थबोधकानि तानि बहूनि वाक्यानि ज्ञानाकाण्डोपनिषदि वर्तन्ते। तस्मात् तस्या उत्कृष्टत्वं भवति। एवं चतुर्णामपि वेदानामेकैकस्मिन् एकैकं महावाक्यमस्ति तत् किमिति चेदाह—

॥ प्रज्ञानं ब्रह्म ॥

इति ऋग्वेदमहावाक्यम्। प्राथमिकत्वात् तस्यैवादावर्थो विचार्यते – अथात्र प्रज्ञानपदं स्थूलभूतशरीरपरं न सम्भवति। तस्य जडत्वाद् अन्तःकरणसापेक्षत्वेनेन्द्रियाणामपि प्रज्ञानपदवाच्यत्वं न सम्भवति। एवं सुषुप्तिकालोपरतत्वेनान्तःकरणस्यापि प्रज्ञानपदवाच्यत्वं न सम्भवति। एवमविद्यायाश्चाज्ञानकारकतयाप्रमाणत्वेन प्रज्ञानपदवाच्यत्वं न सम्भवति। एवं किञ्चिज्ज्ञत्वेन जीवस्यापि प्रज्ञानपदवाच्यत्वं न सम्भवति इति चेद्, अत्रोच्यते– अवस्थात्रयसाक्षिचैतन्यमेव प्रज्ञानपदवाच्यम्। तस्यावस्थात्रयसाक्षितया व्यापकत्वेन सर्वज्ञत्वात् तादृग्भूतसाक्षिचैतन्यं येन अन्तःकरणेन श्रोत्रादिज्ञानेन्द्रियद्वारा शृणोति स्पृशति पश्यति लिह्यति जिघ्रति वदतीत्यादिप्रमाणैस्तस्य तेषां वैशिष्ट्यात् प्रज्ञानपदवाच्यत्वं भवति। यदा तेषां वैशिष्ट्यराहित्य तस्य तदा प्रज्ञानपदलक्ष्यार्थत्वं भवति। एवं ब्रह्मणोऽप्यवस्थाचतुष्टयमध्ये जाग्रति पञ्चीकृतपञ्चमहाभूततत्कार्यस्थूलशरीरसमष्टिविराट्स्वरूपत्वम्। एवं तस्य स्वप्ने तु सूक्ष्मपञ्चभूततत्कार्यसूक्ष्मशरीरसमष्टिहिरण्यगर्भस्वरूपत्वम्। एवं तस्य सुषुप्तौ तु अज्ञानवृत्तिकारकप्रकृतिमायाविद्यावरणविक्षेपात्मककारणपञ्चभूतस्वरूपत्वम्। एवं तस्य तुरीयावस्थायां अभिन्नप्रतिबिम्बेश्वरजीवाभिन्नशक्तिककालकर्मादिकस्वरूपवासनापञ्चभूतस्वरूपत्वं च भवतीत्यतः तस्य ब्रह्मशब्दवाच्यार्थत्वं भवति। पूर्वोक्तावस्थाचतुष्टयोपाधिराहितशुद्ध-

ब्रह्मणः ब्रह्मपदलक्ष्यार्थत्वं भवति । उभयोर्लक्ष्यार्थभूतसाक्षिचैतन्यब्रह्मणोरैक्यार्थबोधकोपदेशवाक्यं प्रज्ञानं ब्रह्मेति ऋग्वेदमहावाक्यमिति । अत्र प्रमाणमाह —

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च ।
स्वाद्वस्वादु विजानाति तत् प्रज्ञानमुदीरितम् ॥

चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु ।
चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि ॥

इत्युपनिषत् ॥

अथ यजुर्वेदमहावाक्यार्थो निरूप्यते-

॥ अहं ब्रह्मास्मि ॥

इति । अथात्र अहंपदस्य शरीरार्थकत्वमेव स्याद् गौरोऽहं स्थूलोऽहमिति प्रतीतेरिति चेन्न । तस्य जडत्वात्, शीतवाताद्युत्पत्तिकाले शरीरमुपेक्ष्य हस्तादिभिश्चक्षुरादीन्द्रियसंरक्षणाच्च । अथैवं चक्षुरादीन्द्रियाणामेवाहं पदार्थत्वं स्यादिति चेत् तदपि न । अन्तःकरणं विना तेषां विषयग्रहासम्भवात् । अथैवमपि अन्तःकरणस्यैवाहंपदवाच्यत्वं स्यादिति चेत् तदपि न । सुषुप्तिकाले तस्यैवोपरतत्वात् । किञ्च जीवस्याप्यहंपदवाच्यत्वं न संभवति । तस्य किञ्चिज्ज्ञत्वादिति चेदत्रोच्यते- अवस्थात्रयसाक्षिभूतकूटस्थ एवाहंपदवाच्यः । तस्यावस्थात्रयव्यापित्वेन सर्वज्ञत्वात् । तादृशाहंपदार्थकूटस्थस्तु जाग्रत्स्वप्नसुषुप्तिषु स्थूलसूक्ष्मकारणशरीरत्रयाभिमानी कर्माभिमानीत्यतस्तस्याहंपदवाच्यार्थत्वं भवति । तादृशाभिमानरहितस्य तस्य अहंपदलक्ष्यार्थत्वं भवति । एवं ब्रह्मणोऽप्यवस्थाचतुष्टयेऽपि पञ्चीकृतपञ्चमहाभूततत्कार्यस्थूलशरीरसमष्टिविराट्स्वरूपत्वे अपञ्चीकृतसूक्ष्मपञ्चभूततत्कार्यसूक्ष्मशरीरसमष्टिहिरण्यगर्भ-

स्वरूपत्वे अज्ञानवृत्तिकारकप्रकृतिमायाविद्याविक्षेपात्मकारणपञ्चभूत-स्वरूपत्वे अभिन्नप्रतिबिम्बेश्वरजीवाभिन्नशक्तिककालकर्मदिक्स्वरूप-वासनापञ्चभूतस्वरूपत्वं च भवतीत्यतस्तस्य ब्रह्मपदवाच्यार्थत्वं भवति । तादृशावस्थाचतुष्टयोपाधिरहितस्य तस्य ब्रह्मशब्दलक्ष्यार्थत्वं भवति । अस्मीत्येतस्य उभयोर्लक्ष्यार्थभूतकूटस्थब्रह्मणोरेकार्थत्वाच्चेति तयोरै-क्यानुसन्धानबोधकवाक्यम् अहं ब्रह्मास्मीति यजुर्वेदमहावाक्यमिति । अत्रापि प्रमाणमाह—

परिपूर्णपरात्मास्मिन् देहेऽविद्याधिकारिणि ।
बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमितीर्यते ॥

स्वतः पूर्णः परात्मात्र ब्रह्मशब्देन वर्णितः ।
अस्मीत्यैक्यपरामर्शात् तेन ब्रह्म भवाम्यहम् ॥

इत्युपनिषत् ।

अथेदानीम् —

॥ तत्त्वमसि ॥

इति सामवेदमहावाक्यार्थः प्रमाणपूर्वकं विचार्यते—

एकमेवाद्वितीयं सन्नामरूपविवर्जितम् ।
सृष्टेः पुराधुनाप्यस्य तादृक्त्वं तदुदाहृतम् ॥

देहेन्द्रियमनोऽतीतं वस्त्वत्र त्वंपदेरितम् ।
एकया गृह्यतेऽसीति तदैक्यमनुभूयताम् ॥

इत्येवमुपनिषत्प्रमाणान्तर्गतम् एकमेवाद्वितीय सदिति वाक्यम् । अस्यार्थः— एकमित्यनेन सजातीयवस्तुभेदो निरस्तः, सजातीय-वस्त्वभावेन प्रतियोग्यप्रसिद्धेः । एवम् एवकारेण वर्ज्यपुत्रभेदवद्

विजातीयवस्तुभेदोऽपि निरस्तः, प्रकृतेरनुगतजडदुःखस्वरूपत्वेन प्रतियोग्यप्रसिद्धेः । अद्वितीयमित्यनेनावयवभेदाभावाद् ब्रह्मणः स्वगतभेदोऽपि निरस्तः । सादित्यस्य सत्त्वं वृद्धिक्षयं विना त्रैकालिकाबाध्यमित्यर्थः । अथ तत्पदं लक्षणया ब्रह्मपरं, त्वंपदं पूर्ववल्लक्षणया कूटस्थपरम्, असिपदम् उभयोरैक्यपरम् । तथाच तत्पदार्थब्रह्मणः पूर्वोक्तप्रकारेण अवस्थाचतुष्टयोपाधिविराड्हिरण्यगर्भाव्याकृताव्यक्तवासनाभूतसम्बन्धाद् ब्रह्मपदवाच्यार्थत्वं, तादृशावस्थाचतुष्टयोपाधिसम्बन्धरहितस्य तस्य ब्रह्मपदलक्ष्यार्थत्वम् । एवं त्वंपदार्थकूटस्थस्तु अवस्थात्रयेऽपि स्थूलसूक्ष्मकारणशरीरत्रयाभिमानी कर्माभिमानीत्यतस्तस्य त्वंपदवाच्यार्थत्वं तादृशाभिमानरहितस्य तस्य त्वंपदलक्ष्यार्थत्वम् । उभयोर्लक्ष्यार्थकूटस्थब्रह्मणोरैक्यबोधकम् असिपदम् । एवं छान्दोग्यश्रुतिगततत्त्वमसीतिवाक्यम् उपदेशमहावाक्यमिति ॥

अथेदानीम् अथर्वणवेदमहावाक्यार्थो विचार्यते—

आध्यात्मिकाधिभौतिकाधिदैविकतापत्रयासहिष्णुत्वेन तन्निवृत्त्यर्थमाचार्यमुपसङ्गम्य तान्निवृत्तिः केन भवेदित्युक्तवते स गुरुः परमकृपया तस्मै शिष्याय

॥ अयमात्मा ब्रह्म ॥

इत्यथर्वणवेदमहावाक्यार्थं सयुक्तिकं यदुपदिष्टवान् तदेवाह । अयमात्मा ब्रह्मेति वाक्यं पदत्रयघटितम् । अथात्मपदस्य पुत्रदारधनादिपरत्वमेव स्याद् 'आत्मा वै पुत्रनामासि' 'अर्धो वा एष आत्मनः यत् पत्नी अर्धा बहिश्चराः प्राणाः" इत्यादिप्रमाणैरिति चेत् तन्न सम्भवति । गृहादीनामग्निदाहकाले आत्मत्राणार्थं पुत्रदारधनादिकं त्यक्त्वैव बहिः पलायनस्य दर्शनात् । अथैवमात्मपदस्य शरीरार्थत्वं स्यात्, पीतोऽहं स्थूलोऽहमित्यादिप्रतीतेरिति चेत् तदपि न ।

शीतवाततडिद्वर्षाद्युत्पत्तिकाले शरीरमप्युपेक्ष्य हस्तादिभिश्चक्षुरादीन्द्रिय-रक्षणाद् जडत्वाच्च । अथैवमपि चक्षुरादीन्द्रियाणामेवात्मपदवाच्य-त्वं स्यादिति चेत् तदपि न । ध्यानकाले तेषामुपेक्षणस्य दृष्टत्वादन्तः करणं विना विषयग्रहणासम्भवाच्च । अथैवमपि मन एवात्मपद-वाच्यं स्यादिति चेत् तदपि न । सुषुप्तिकाले तस्योपरतत्वात् । एवमविद्यास्वरूपाज्ञानस्यात्मपदवाच्यत्वं न सम्भवति । बाधज्ञानेन तस्या-प्रमाणत्वात् । एवं प्रत्यगात्मस्वरूपजीवपरत्वमप्यात्मपदस्य न स-म्भवति । तस्य किञ्चिज्ज्ञत्वान्मरणकालीनदुःखासहिष्णुत्वेन परम-सुखापेक्षया जीवोपेक्षापूर्वकानुभवदर्शनाच्चेति चेद् अत्रोच्यते— आत्म-पदं ज्ञानात्मपरमेव स्यात् तस्यावस्थात्रयसाक्षितया व्यापकत्वेन सर्वज्ञत्वात् । अत एव पूर्वोक्तप्रकारेण बुद्धियुक्तितः सम्यग्विचार्य आत्मपदवाच्यत्वेन स्थिरीकृतावस्थात्रयसाक्षिभूतज्ञानात्मानन्दमय-मिति निर्दिश्यैवोक्त आत्मा । अथ तादृग्भूतेदंपदनिर्दिष्टज्ञानात्मा तु अवस्थात्रयेऽपि स्थूलसूक्ष्मकारणशरीरत्रयाभिमानी कर्माभिमानी-त्यतस्तस्यात्मपदवाच्यार्थत्वं भवति । तादृशाभिमानरहितस्य तस्य आत्मपदलक्ष्यार्थत्वं भवति । एवं ब्रह्मणोऽप्यवस्थाचतुष्टये विराड्ढि-रण्यगर्भाव्याकृताव्यक्तभूतसम्बन्धात् तस्य ब्रह्मपदवाच्यार्थत्वं भवति । तादृशविराडादिसम्बन्धरहितशुद्धब्रह्मणो ब्रह्मशब्दलक्ष्यार्थत्वं भवति । उभयोर्लक्ष्यार्थभूतज्ञानात्मब्रह्मणोरैक्यस्वरूपसाक्षात्कारकारकानुसन्धान-वाक्यम् अयमात्मा ब्रह्मेत्यथर्वणवेदमहावाक्यमिति ।

अत्रापि प्रमाणमाह—

स्वप्रकाशापरोक्षत्वादयमित्युक्तितो मतम् ।
अहङ्कारादिदेहान्तात् प्रत्यगात्मेति गीयते ॥

दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीरितम् ।
ब्रह्मशब्देन तद् ब्रह्म स्वप्रकाशात्मरूपकम् ॥

इत्युपनिषत् । इह कश्चित् पुरुषधौरेयः कुतश्चिद् भाग्योदयाद् विहितानिष्कामनित्यकर्मानुष्ठानेन शुद्धान्तःकरणः सन् नित्यानित्यवस्तूनि विवेचयति -- आत्मैव नित्यः, जगत् सर्वमनित्यं, ब्रह्म सत्यं जगन्मिथ्येति च । ततो नित्यफलार्थितया इहामुत्रफलभोगवान् न भवति । ततस्तस्य शमादिषट्कं जायते । शमदमोपरतितितिक्षासमाधानश्रद्धा इति शमादिषट्कम् । अन्तरिन्द्रियनिग्रहः शमः । बहिरिन्द्रियनिग्रहो दमः । सन्न्यासमुपरतिर्विक्षेपाभावो वा । शीतोष्णसुखदुःखद्वन्द्वसहनं तितिक्षा । निगृहीतस्य मनसः प्रत्यगात्मप्रापणं समाधानम् । गुरुवेदान्तवाक्येषु विश्वासः श्रद्धा । एवं शमादिषट्कानन्तरमुत्कटमुमुक्षा भवति । तथा सत्येवं नित्यानित्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः शमादिषट्कसम्पत्तिर्मुमुक्षुत्वं च इत्येवं साधनचतुष्टयसम्पन्नः श्रवणेऽधिकारी । सोऽयं मोक्षस्य ज्ञानैकसाध्यत्वं बुद्ध्वा तदर्थमुपहारसमित्पाणिः सदाचार्यमधिगच्छति । सोऽपि देशिकः परमकृपया तस्मै शिष्याय पूर्वोक्तप्रकारेण महावाक्यार्थमुपदिशति । ततः शिष्यः श्रुतं तद् ब्रह्मात्मैक्यमनुकूलाभिर्युक्तिभिरनुचिन्तयति । इद मननम् । अनुचिन्त्य निश्चितं ब्रह्मात्मैक्यं ध्यायतीति निदिध्यासनम् । एवं श्रवणमनननिदिध्यासनेषु बहुकालमादरेण पुनःपुनः क्रियमाणेषु सत्सु ब्रह्मैवाहमस्मीति ब्रह्मसाक्षात्कारो जायते । इयमेवाखण्डाकारवृत्तिः । अस्यां प्रतिबिम्बितज्ञानस्वरूपात्मा अज्ञानावरणशक्तिं दहति । तदायं ज्ञानी जीवन्मुक्त इत्युच्यते । प्रारब्धकर्मणश्शान्ते अज्ञानस्य विक्षेपशक्तिमपि प्रतिबिम्बस्वरूपात्मसहिताखण्डाकारवृत्तिमपि दग्ध्वा अग्निरिव स्वयमपि दह्यते । तदायं ज्ञानी अखण्डसच्चिदानन्दस्वरूपेणावतिष्ठते । अज्ञानस्य कर्मणश्चाभावान्मुक्तस्य पुनर्जन्म नास्ति । अयमेव मोक्षस्य क्रमः । ईश्वरस्य जीवस्य च ब्रह्मप्रतिबिम्बितत्वान्न ब्रह्मणो भिन्नत्वं बिम्बप्रतिबिम्बयोरभेदादिति दिक् ।

अतः परं तत्त्वानां लयक्रममारप्स्ये । * स्थूलभूतशरीराणि स्वस्वबन्धं विसृज्य सूक्ष्मभूतेषु सात्त्विकराजसगुणावेव परिणमन्ति । तेषु सूक्ष्मभूतेषु पृथिवी आप एव आपस्तेज एव तेजो वायुरेव वायुराकाश एव आकाशो विक्षेपशक्तिरेव विक्षेपावरणशक्त्योश्च मूलप्रकृतितामसगुणे लयं भवति(?)। तामसप्रकृत्यविद्यामायोपेतालीकभूतमूलप्रकृतिरपि रज्जौ सर्पत्वज्ञानमिव स्वस्याधिष्ठानभूताखण्डपरिपूर्णसच्चिदानन्दब्रह्मणि विलीयत इति दिक् ।

एवं ब्रह्मणि कल्पितस्य प्रपञ्चस्य रज्जौ कल्पितस्य सर्पस्येव नास्तीत्येवं निषेध एवापवादः। पूर्वोक्ताध्यारोपेणानेन चापवादेन शाखाचन्द्र इव ब्रह्मैव लक्ष्यते ।

युक्तितो बुद्धितश्चादिनारायणबुधेन तु ।
चतुर्वेदमहावाक्यटीका चिन्तामणिः कृता ॥

अद्वैतामृतसागरोन्मथनजैरद्वैततत्त्वात्मकै-
युक्ता विद्रुमपद्मरागमणिभिः साकं यथा भासते ।
अद्वैतार्थसुबोधिनी सुकृतिनामद्वैतभाग्यप्रदा
सेयं वाक्यचतुष्टयार्थफलदा चिन्तामणिस्तत्त्वतः ॥

---

* 'स्थूलभूतशरीराणि स्वस्वरूपं विसृज्य सूक्ष्मभूतेषु सात्त्विकराजसगुणयोरेव विलीयन्ते । तेषु सूक्ष्मभूतेषु पृथिवी अप्स्वेव, आपस्तेजस्येव, तेजो वायावेव, वायुराकाश एव आकाशो विक्षेपशक्तावेव लयं प्राप्नुवन्ति । विक्षेपावरणशक्त्योश्च मूलप्रकृतिगततमोगुणे लयो भवति' । इति ग्रन्थकर्तुराशयः स्यादिति प्रतिभाति ॥

कल्याणाचलकोदण्डः कल्याणाचलमन्दिरः ।
कल्याणवेषधारीशः कल्याणं कुरुतां सदा ॥

इति चतुर्वेदमहावाक्यटीका चिन्तामणिः समाप्ता । *

---

* इतः परं—

'चतुर्वेदमहावाक्यटीकाचिन्तामणिं तु ये ।
द्रष्टारो युक्तिबुद्धिभ्यां स्वात्मानुभवकाङ्क्षया ॥
अनन्तेनैव वक्तव्यं फलं तेषां विशेषतः ।
तथाप्युत्तरपद्येन यथामति फलं ब्रुवे' ॥

इति पद्यद्वयं दृश्यते । किन्तु यथाप्रतिश्रुतं फलकथनं न दृश्यते ॥